## आदृगमहनजनः किकिनौ लिट् च। (१७१/३१८१)

आकारान्तेभ्यः[1] ऋवर्णान्तेभ्यः गम हन जन इत्येतेभ्यश्च[2]छन्दसि [3]विषये तच्छीलादिषु[4] किकिनौ प्रत्ययौ भवतः। लिड्वच्च[5] तौ भवतः। आत् इति तकारो [6]मुखसुखार्थः, न त्वयं तपरः, [7]मा भूत्तादपि परः तपरः इति ऋकारे तत्कालग्रहणम्। 'पपिः सोमं ददिर्गाः' (ऋ. ६.२३.४)। ददथुः मित्रावरुणा ततुरिम् (ऋ.४.३९.२) [8]मित्रावरुणौ ततुरिः।'दूरे ह्यध्वा जगुरिः' (ऋ. १०.१०८.१)। [9]'जग्मिर्युवा' (ऋ. ७.२०.१)। [10]'जघ्निर्वृत्रम्' (ऋ. ९.६१.२०)। [11]'जज्ञि बीजम्' (तै. सं. ७.५.२०.१)। अथ किमर्थं कित्त्वम्, यावता 'असंयोगाल्लिट् कित्' (१.२.५/२२४२) इति कित्त्वं सिद्धमेव ? 'ऋच्छत्यृताम्' (७.४.११/२३८३) इति लिटि गुणः प्रतिषेधविषय आरभ्यते, तस्यापि बाधनार्थं[12] [13]कित्त्वम्।

[२८३] [14]किकिनावुत्सर्गश्छन्दसि सदादिभ्यो दर्शनात्। (म. भा. २.१३५)

'सेदिः' (तै. आ. ४.२२.१)। [15]'नेमिः' (ऋ. २.५.३)।

[२८४] भाषायां धाञ्कृञ्सृजनिगमिनमिभ्यः [16]किकिनौ वक्तव्यौ। (म. भा. २.१३५)

[17]दधिः। चक्रिः। सस्रिः। जज्ञिः। [18]जग्मिः। नेमिः।

[२८५] सहिवहिचलिपतिभ्यो यङन्तेभ्यः किकिनौ वक्तव्यौ।

'दीर्घोऽकितः' (७.४.८३/२६३२) सासहिः। वावहिः। चाचलिः। पापतिः॥

## स्वपितृषोर्नजिङ्। (१७२/३१८२)

छन्दसि इति निवृत्तम्। स्वपेः तृषेश्च[19] [20]तच्छीलादिषु कर्तृषु नजिङ प्रत्ययो भवति। [21]स्वप्नक्। [22]तृष्णक्।

[२८६] धृषेश्चेति वक्तव्यम्।
[23]धृष्णक्॥

## शॄवन्द्योरारुः। (१७३/३१८३)

'शॄ हिंसायाम्' (धा. पा. १४८९), 'वदि अभिवादनस्तुत्योः (धा. पा. ११), [24]एताभ्यां [25]धातुभ्यां तच्छीलादिषु कर्तृषु आरुः प्रत्ययो भवति। शरारुः। वन्दारुः॥

---

1. धातुभ्यः इत्यधिकम् ग. फ. ह, ऋकारान्तेभ्यश्च ब. 2. धातुभ्यः इत्यधिकम् ब. 3. विषये नास्ति फ. 4. कर्तृषु इत्यधिकम् ब. 5. च नास्ति ब. 6. सुखमुखार्थः फ. 7. तेन इत्यधिकम् ह. 8. ऋ-कारान्तेभ्यः इत्यधिकम् क, ऋवर्णात् इत्यधिकम् फ. 9. गमहनजन इत्यधिकम् अ. 10. जिजघ्निः ह. 11. जज्ञिर्बीजम् ह. मुद्रितः पाठः, वर्ष्टा पर्जन्यः इत्यधिकम् फ. ह, वर्षासु पर्जन्यः इत्यधिकम् अ. क. ब. 12. पुनः इत्यधिकम् अ. 13. कित्त्वम् नास्ति फ. 14. किकिनौ नास्ति फ. ह, किकिनौ उत्सर्गौ अ. 15. नेमिश्च-क्रमिवाभवन् अ. 16. किकिनौ नास्ति ह. 17. दधि ह. 18. जग्मिः नास्ति ह. 19. धात्वोः इत्यधिकम् ब. क. फ. 20. तच्छीलादिषु नास्ति क. 21. स्वप्नक् स्वप्नजौ स्वप्नजः ब. ह. 22. तृष्णक् तृष्णजौ तृष्णजः अ. ब. क. ड. 23. धृष्णुक् धृष्णुजौ धृष्णुजः अ. ह. 24. इत्याभ्याम् क. 25. धातुभ्यां नास्ति फ.